श्रीराधाकृष्णाभ्यां नमः

## आचार्यमम्मट विरचित

# काव्यप्रकाश

*आयोजक- संस्कृतशिक्षा( Sanskrit Education) फेसबुक समूह*

**अध्यापक- श्रीगङ्गाशरण व्यास**

आप सब जिज्ञासुओं को देखते हुये संस्कृतशिक्षा (Sanskrit Education) फेसबुक समूह द्वारा काव्यप्रकाश का सम्पूर्ण अध्यापन Zoom एप् तथा फेसबुक लाईव के माध्यम से कराया जा रहा है। अतः आप सब से निवेदन है, वीडिओ को अधिक से अधिक शेयर कर जिज्ञासुओं तक पहुचाने में मदद करें।। धन्यवाद।।

क्रमेण शब्दार्थयोः स्वरूपमाह-

स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा।

अत्रेति काव्ये। स्वरूपं वक्ष्यते।

वाच्यादयः तदर्थः स्युः तात्पर्यार्थोऽपि केषुचित्।।

वाच्य-लक्ष्य-व्यङ्ग्याः।

(अभिहितान्वयवाद और तात्पर्यार्थरूप वाक्यार्थ)

आकाङ्क्षा-योग्यता-सन्निधिवशाद्वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये तात्पर्यार्थो विशेषवपुरपदार्थोऽपि वाक्यार्थः समुल्लसतीत्यभिहिनान्वयवादिनां मतम्।।

(अन्विताभिधानवाद और वाच्यार्थरूप वाक्यार्थ)

वाच्य एव वाक्यार्थ इत्यन्विताभिधानवादिनः।।

# विद्यालयं गच्छति

| पद | विद्यालय | + | अम् | गम् | + | ति |
|---|---|---|---|---|---|---|

सम्बन्ध

पद और अर्थ के सम्बन्ध को ही अभिधा कहते हैं

पदार्थ

अर्थ



कर्म

गमन



कुमारिलभट्ट के मतानुसार वाक्यार्थ पदार्थ से भिन्न होता है। इस लिये वाक्यार्थ को विशेषवपुः अपदार्थ कहा जाता है।

**वाक्यार्थ- विद्यालय जाता है**

**सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते।**

सर्वेषां वाच्य-लक्ष्य-व्यङ्ग्यानाम्

**तत्र वाच्यस्य यथा-**

**मातः ! गृहोपकरणम् अद्य खलु नास्तीति साधितं त्वया ।**
**तद्भण किं करणीयम् एवमेव न वासरः स्थीयी ॥**

अत्र स्वैरविहारार्थिनीति व्यज्यते

**लक्ष्यस्य यथा-**

**साधयन्ती सखि सुभगं क्षणे क्षणे दूनाऽसि मत्कृते ।**
**सद्भावस्नेहकरणीयसदृशकं तावत्विरचितं त्वया ॥**

अत्र मत्प्रियं रमयन्त्या त्वया शत्रुत्वमाचरितमिति लक्ष्यम् । तेन च कामुकविषयं सापराधत्वप्रकाशनं व्यङ्ग्यम् ।

व्यङ्ग्यस्य यथा-

**पश्य निश्चलनिष्पन्दा विसिनीपत्रे राजते बलाका ।**
**निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव ।।**

अत्र निष्पन्दत्वेन आश्वस्तत्वम् । तेन च जनरहितत्वम् । अतः संकेतस्थानमेतदिदिति कयाचित्कञ्चित्प्रत्युच्यते । अथवा मिथ्या वदसि न त्वमत्रागतोभूरिति व्यज्यते ॥

**आश्वस्तत्वम् = निर्भयत्वम्**

वाचकादीनां क्रमेण स्वरूपमाह-

साक्षात्सङ्केतितं योऽर्थमभिधत्ते स वाचकः ॥

इहागृहीतसङ्केतस्य शब्दस्यार्थप्रतीतेरभावात् संकेतसहाय एव शब्दोऽर्थविशेषं प्रतिपादयतीति यस्य यत्राव्यवधानेन संकेतो गृह्यते स तस्य वाचकः ॥७॥

**साक्षात्** = शब्दव्यापारानन्तरम्। **यः** = शब्दः। **सङ्केतितः** सङ्केतः जातः यस्य अर्थस्य सः

# सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा ।

यद्यप्यर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव तथाप्यानन्त्याद्व्यभिचाराच्च तत्र संकेतः कर्तुं न युज्यत इति गौः शुक्लश्चलो डित्थ इत्यादीनां विषयविभागो न प्राप्नोतीति च ।
तदुपाधावेव संकेतः ।

व्यक्ति

गौः

(गोत्व)जातिः
शुक्लः(गुण)
चलः(क्रिया)
डित्थः(सञ्ज्ञा)
द्रव्यम्(मांसपिण्ड)



उपाधिश्च द्विविधः वस्तुधर्मो वक्तृयदृच्छासंनिवेशितश्च । वस्तुधर्मोऽपि द्विविधः सिद्धः साध्यश्च । सिद्धोऽपि द्विविधः पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च ।

तत्राद्यो जातिः । उक्तं हि वाक्यपदीये {न हि गौः स्वरूपेण गौर्नाप्यगौः । गोत्वाभिसंवन्धातु गौः} इति । द्वितीयो गुणः । शुक्लादिना हि लब्धसत्ताकं वस्तु विशिष्यते ।

साध्यः पूर्वापरीभूतावयवः क्रियारूपः । डित्थादिशब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं वक्रा यदृच्छया डित्थादिष्वर्थेषूपाधित्वेन संनिवेश्यत इति सोऽयं संज्ञारूपो यदृच्छात्मक इति । {गौःशुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिः} इति महाभाष्यकारः ।

**उपाधिः -** **1.वस्तुधर्मः** (1. जातिरूपः 2. गुणरूपः 3. क्रियारूपः)
**2.वक्तृयदृच्छासंनिवेशितः =** वक्तुः इच्छया संनिवेशितः डित्थादिसञ्ज्ञारूपः

**वस्तुधर्मः -** **1. सिद्धः**
**2. साध्यश्च** (पूर्वापरीभूतक्रियारूपः)

**सिद्धः-** **1.पदार्थस्य प्राणप्रदो** (गोत्वादिजातिरूपः)
**2.विशेषाधानहेतुश्च** (शुक्लादिभेदकधर्माः गुणादिरूपाः)

परमाण्वादीनां तु गुणमध्यपाठात् पारिभाषिकं गुणत्वम्। गुणक्रियायदृच्छानां वस्तुत एकरूपाणामप्याश्रयभेदाद्भेद इव लक्ष्यते। यथैकस्य मुखस्य खड्गमुकुरतैलाद्यालम्बनभेदात्।

# जातौ एव सङ्केतः इति मीमांसकनां मतम्

हिमपयःशङ्खाद्याश्रयेषु परमार्थतो भिन्नेषु शुक्लादिषु यद्वशेन शुक्लः शुक्ल इत्याद्यभिन्नाभिधानप्रत्ययोत्पत्तिस्तत् शुक्लत्वादि सामान्यम्। गुडतण्डुलादिपाकादिष्वेवमेव पाकत्वादि।

बालवृद्धशुकाद्युदीरितेषु डित्थादिशब्देषु च प्रतिक्षणं भिद्यमानेषु डित्थाद्यर्थेषु वा डित्थत्वाद्यस्तीति सर्वेषां शब्दानां जातिरेव प्रवृत्तिनिमित्तमित्यन्ये।

तद्वान् अपोहो वा शब्दार्थः कैश्चिदुक्त इति ग्रन्थगौरवभयात् प्रकृतानुपयोगाच्च न दर्शितम्।

तद्वान् जातिमान् यथा घटत्ववान् घटः  अपोह अतद्व्यावृत्ति अथवा तद्भिन्नभिन्नत्वम्

अभिधास्वरूपम्- स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते।

स साक्षात् सङ्केतितः अर्थः, मुख्योऽर्थः (भवति) तत्र मुख्यार्थस्य बोधे अस्य शब्दस्य, व्यापारः अभिधा उच्यते।

## लक्षणास्वरूपम्

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया ।।9 ।।

मुख्यार्थबाधे तद्योगे मुख्यार्थसम्बन्धे, रूढितः प्रसिद्धेः, अथ अथवा प्रयोजनात् यत् यया वृत्त्या अन्यः अर्थः लक्ष्यते, सा आरोपिता क्रिया व्यापरो लक्षणा इति।

गुडपाकक्रिया



राम



शुक्ल



तण्डुलपाकक्रिया



राम



शुक्ल



कर्मणि कुशलः इत्यादौ दर्भग्रहणाद्ययोगात् गङ्गायां घोषः इत्यादौ च गङ्गादीनां घोषाद्याधारत्वासंभवात्

मुख्यार्थस्य बाधे विवेचकत्वादौ सामीप्ये च संबन्धे रूढितः प्रसिद्धेः,

तथा गङ्गातटे घोष इत्यादेः प्रयोगात् येषां न तथा प्रतिपत्तिः,

तेषां पावनत्वादीनां धर्माणां तथाप्रतिपादनात्मनः प्रयोजनाच्च मुख्येन अमुख्योऽर्थो लक्ष्यते यत् स आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठो लक्षणा।

सान्तरार्थनिष्ठः अन्तरं व्यवधानं तेन सह वर्तते इति सान्तरः व्यवहितः  यः अर्थः लक्ष्यरूपः

## लक्षणायाः भेदाः

स्वासिद्धये पराक्षेपः परार्थं स्वसमर्पणम् ।
उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ॥

स्वासिद्धये पराक्षेपःउपादानं, स्वस्य अन्वय सिद्ध्यर्थं अन्यार्थस्य ग्रहणं उपादाननामिका लक्षणा भवति, परार्थं स्वसमर्पणम् लक्षणं, अन्यार्थस्य सिद्ध्यर्थं स्वस्यार्थस्य परित्यागः लक्षणनामिका लक्षणा भवति, इति सा द्विधा शुद्धा एव उक्ता, अनेन प्रकारेण अत्र भेदद्वयात्मिका शुद्धा एव कथिता।

कुन्ताः प्रविशन्ति यष्टयः प्रविशन्ति इत्यादौ कुन्तादिभिरात्मनः प्रवेशसिद्ध्यर्थं स्वसंयोगिनः पुरुषा आक्षिप्यन्ते । तत उपादानेनेऽयं लक्षणा।

# मुकुलभट्टकृतायाः लक्षणायाः उदाहरणानां खण्डनम्

गौरनुबन्ध्यः इत्यादौ श्रुतिचोदितमनुबन्धनं कथं मे स्यादिति जात्या व्यक्तिराक्षिप्यते न तु शब्देनोच्यते विशेष्यं नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे इति न्यायादित्युपादानलक्षणा तु नोदाहर्तव्या ।

न ह्यत्र प्रयोजनमस्ति न वा रूढिरियम् । व्यक्त्यविनाभावित्वात्तु जात्या व्यक्तिराक्षिप्यते ।

यथा क्रियतामित्यत्र कर्ता । कुर्वित्यत्र कर्म । प्रविश पिण्डीमित्यादौ गृहं भक्षयेत्यादि च । पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र च रात्रिभोजनं न लक्ष्यते श्रुतार्थापत्तेरर्थापत्तेर्वा तस्य विषयत्वात् ।

## अर्थापत्तिः = अर्थस्य अनुक्तार्थस्य आपत्तिः = सिद्धिः

तल्लक्षणम् तत्रोपपाद्यज्ञानेन उपपादकस्य कल्पनमिति अर्थापत्तिः ।

यथा- पीनो देवदत्तः दिवा न भुङ्क्ते अत्र रात्रिभोजनम् अर्थापत्तिप्रमाणेन लक्ष्यते ।
रात्रिभोजनम् उपपादकं
पीनत्वम् उपपाद्यम् ।

गङ्गायां घोषः इत्यत्र तटस्य घोषाधिकरणत्वसिद्धये गङ्गाशब्दः स्वार्थमर्पयति इत्येवमादौ लक्षणेनैषा लक्षणा । उभयरूपा चेयं शुद्धा । उपचारेणामिश्रितत्वात् ।

अनयोर्लक्ष्यस्य लक्षकस्य च न भेदरूपं ताटस्थ्यम् । तटादीनां गङ्गादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजनसम्प्रत्ययः । गङ्गासम्बन्धमात्रप्रतीतौ तु गङ्गातटे घोष इति मुख्यशब्दाभिधानाल्लक्षणायाः को भेदः ।

## भेदद्वयात्मिका शुद्धालक्षणा गौणीलक्षणा च

### सारोपालक्षणा

सारोपान्या तु यत्रोक्तौ विषयी विषयस्तथा ।

आरोप्यमाणः आरोपविषयश्च यत्रानपह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते सा लक्षणा सारोपा ॥

# साध्यवसानालक्षणा

विष्ययय्यन्तःकृतेऽन्यस्मिन् सा स्यात्साध्यवसानिका ॥

विषयिणारोप्यमाणेनान्तःकृते निगीर्णे अन्यस्मिन्नारोपविषये सति साध्यवसाना स्यात् ॥११ ॥

अत्र हि स्वार्थसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यमाणा अपि गोशब्दस्य परार्थाभिधाने प्रवृत्तिनिमित्तत्वमुपयान्तिं इति केचित् ।

स्वार्थसहचारिगुणाभेदेन पदार्थगता गुणा एव लक्ष्यन्ते न परार्थोऽभिधीयते इत्यन्ये ।

साधारणगुणाश्रयत्वेन परार्थ एव लक्ष्यते इत्यपरे ।

भेदाविमौ च साद्दश्यात्सम्बन्धान्तरतस्तथा ।
गौणौ शुद्धौ च विज्ञेयौ.................... ।।

इमावारोपाध्यवसानरूपौ साद्दश्यहेतू भेदौ गौर्वाहीकः इत्यत्र गौरयम् इत्यत्र च ।

उक्तं चान्यत्र

अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते ।
लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता ।। इति । [कुमारिल, तन्त्रवार्तिक ३,४.१२]

अविनाभावोऽत्र संबन्धमात्रं न तु नान्तरीयकत्वम्, तत्त्वे हि मञ्चाः क्रोशन्ति इत्यादौ न लक्षणा स्यात् । अविनाभावे चाक्षेपेणैव सिद्धेर्लक्षणाया नोपयोग इत्युक्तम् ।

आयुर्धृतम् आयुरेवेदम् इत्यादौ च सादृश्यादन्यत्कार्यकारणभावादि संबन्धान्तरम् । एवमादौ च कार्यकारणभावादिलक्षणपूर्वे आरोपाध्यवसाने ।

अत्र गौणभेदयोर्भेदेऽपि ताद्रूप्यप्रतीतिः सर्वथैवाभेदावगमश्च प्रयोजनम् ।

शुद्धभेदयोस्त्वन्यवैलक्षण्येनाव्यभिचारेण च कार्यकारित्वादि । क्वचित्तादर्थ्यादुपचारः ।
यथा इन्द्रार्था स्थूणा इन्द्रः ।

क्वचित्स्वस्वामिभावात् । यथा राजकीयः पुरुषो राजा । क्वचितवयवावयविभावात् ।
यथा अग्रहस्त इत्यत्राग्रमात्रेऽवयवे हस्तः ।

क्वचित्तात्कर्म्यात् । यथा अतक्षा तक्षा ॥

.....................लक्षणा तेन षड्विधा ॥

आद्यभेदाभ्यां सह ॥१२॥



लक्षणा
शुद्धा
गौणी
उपादान
लक्षण
सारोपा
साध्यवसाना
सारोपा
साध्यवसाना

सा च-

व्यङ्ग्येन रहिता रूढौ सहिता तु प्रयोजने ।

प्रयोजनं हि व्यञ्जनव्यापारगम्यमेव ॥

तच्च गूढमगूढं वा......................।।

तच्चेति व्यङ्ग्यम् ।

गूढं यथा-

मुखं विकसितस्मितं वशितवक्रिम प्रेक्षितं,
समुच्छलितविभ्रमा गतिरपास्तसंस्था मतिः ।
उरो मुकुलितस्तनं जघनमंसवन्धोद्धुरं,
बतेन्दुवदनातनौ तरुणिमोद्गमो मोदते ॥९॥

अत्रोपदिशतीति ॥

बत ! इन्दुवदनातनौ तरुणिमोद्गमो मोदते, मुखं विकसितस्मितं, वशितवक्रिम प्रेक्षितं, समुच्छलितविभ्रमा गतिः अपास्तसंस्था मतिः, उरो मुकुलितस्तनं, जघनम् अंसबन्धोद्धुरं।।

अगूढं यथा-

श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम् ।
उपदिशति कामिनीनां यौवनमद एव ललितानि ॥१० ॥

## व्यङ्ग्यदृष्ट्या लक्षणायाः त्रिविधत्वम्

…………………… **तदेषा कथिता त्रिधा ॥**

अव्यङ्ग्या गूढव्यङ्ग्या अगूढव्यङ्ग्या च ॥१३ ॥

**तद्भूर्लाक्षिणिकः…………………………… ।**

शब्द इति संबध्यते । तद्भूस्तदाश्रयः ॥

……………………**तत्र व्यापारो व्यञ्जनात्मकः ।।**

.....................तत्र व्यापारो व्यञ्जनात्मकः ।।

तत्र व्यञ्जनारूपप्रयोजनस्य विषये लाक्षणिकशब्दस्य लक्षणातो भिन्नो व्यञ्जनात्मको व्यापारो भवति।

कुत इत्याह-

**यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते।**
**फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया ।।**

प्रयोजनप्रतिपिपादयिषया यत्र लक्षणया शब्दप्रयोगस्तत्र नान्यतस्तत्प्रतीतिरपि तु तस्मादेव शब्दात् । न चात्र व्यञ्जनादृतेऽन्यो व्यापारः ॥

**प्रयोजनप्रतिपिपादयिषया = प्रयोजनप्रतिपादयितुम् इच्छया**

तथाहि-

**नाभिधा समयाभावात्..................... ।**

गङ्गायां घोष इत्यादौ ये पावनत्वादयो धर्मास्तटादौ प्रतीयन्ते न तत्र गङ्गादिशब्दाः संकेतिताः ॥

**.........................हेत्वभावान्न लक्षणा ॥**

मुख्यार्थबाधादित्रयं हेतुः ॥१५॥

तथा च- **लक्ष्यं न मुख्यं नाप्यत्र बाधो योगः फलेन नो ।**
**न प्रयोजनमेतस्मिन्न च शब्दः स्खलद्गतिः ॥**

यथा गङ्गाशब्दः स्रोतसि सबाध इति तटं लक्षयति तद्वत्यदि तटेऽपि सबाधः स्यात्तत्प्रयोजनं लक्षयेत् ।
न च तटं मुख्योऽर्थः । नाप्यत्र बाधः ।

न च गङ्गाशब्दार्थस्य तटस्य पावनत्वाद्यैर्लक्षणीयैः संबन्धः । नापि प्रयोजने लक्ष्ये किञ्चित्प्रयोजनम् ।
नापि गङ्गाशब्दस्तटमिव प्रयोजनं प्रतिपादयितुमसमर्थः ॥१६ ॥

एवमप्यनवस्था स्याद्या मूलक्षयकारिणी ।

एवमपि प्रयोजनं चेल्लक्ष्यते तत्प्रयोजनान्तरेणेति तदपि प्रयोजनान्तरेणेति प्रकृताप्रतीतिकृतनवस्था भवेत् ॥

ननु पावनत्वादिधर्मयुक्तमेव तटं लक्ष्यते । गङ्गायास्तटे घोषः इत्यतोऽधिकस्यार्थस्य प्रतीतिश्च प्रयोजनमिति विशिष्टे लक्षणा।

तत्किं व्यञ्जनयेत्याह-

प्रयोजनेन सहितं लक्षणीयं न युज्यते ॥ १७ ॥

लक्षणीयम् = लक्षणाजन्यज्ञानविषयः (तटम्)

कुत इत्याह-

ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम् ।

प्रत्यक्षादेर्नीलादिर्विषयः फलं तु प्रक्टता संवित्तिर्वा ॥

## विशिष्टलक्षणावादीनां मतस्य खण्डनम्

**विशिष्टे लक्षणा नैवं........................ ।**

व्याख्यातम् ॥

**..................... विशेषाः स्युस्तु लक्षिते ॥ १८ ॥**

तटादौ ये विशेषाः पावनत्वादयस्ते चाभिधातात्पर्यलक्षणाभ्यो व्यापारान्तरेण गम्याः । तच्च व्यञ्जनध्वननद्योतनादिशब्दवाच्यमवश्यमेषितव्यम् एवं लक्षणामूलं व्यञ्जकत्वमुक्तम्।।

अभिधामूलं त्वाह-

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम् ॥ १९ ॥

संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥ (भर्तृहरि, वाक्यपदीय)

इत्युक्तदिशा सशङ्खचक्रो हरिः अशङ्खचक्रो हरिरित्युच्यते । रामलक्ष्मणाविति दाशरथौ
रामार्जुनगतिस्तयोरिति भार्गवकार्तवीर्ययोः । स्थाणुं भज भवच्छिदे, इति हरे ।

सर्वं जानाति देव इति युष्मदर्थे । कुपितो मकरध्वज इति कामे । देवस्य पुरारातेरिति शंभौ ।
मधुना मत्तः कोकिल इति वसन्ते । पातु वो दयितामुखमिति सांमुख्ये ।
भात्यत्र परमेश्वर इति राजधानीरूपात्देशाद्राजनि । चित्रभानुर्विभातीति दिने रवौ रात्रौ वह्नौ ।
मित्रं भातीति सुहृदि मित्रो भातीति रवौ ।
इन्द्रशत्रुरित्यादौ वेदे एव न काव्ये स्वरो विशेषप्रतीतिकृत् ।

आदिग्रहणात्-

एतावन्मात्रस्तनिका एतावन्मात्राभ्यामक्षिपत्राभ्याम् ।
एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः ॥ (हालगाथासप्तशती ९७३)
इत्यादावभिनयादयः ।

आदिपदेन = अपदेशस्य अभिनयस्य च ग्रहणं भवति।

अपदेशो नाम हृदयनिहितहस्तादिनाऽभिमतनिर्देशः

अभिनय अवस्थानुकृतिर्नाट्यम्

इत्यादावभिनयादयः ।

इत्थं संयोगादिभिरर्थान्तराभिधायकत्वे निवारितेऽप्यनेकार्थस्य शब्दस्य यत्किचिदर्थान्तरप्रतिपादनं
तत्र नाभिधा नियमनात्तस्याः । न च लक्षणा मुख्यार्थबाधाद्यभावात् ।
अपि त्वञ्जनं व्यञ्जनमेव व्यापारः

**यथा-**

**भद्रात्मनो दुरधिरोहतनोर्विशाल-वंशोन्नतेःकृतशिलीमुखसंग्रहस्य ।**
**यस्यानुपप्लुतगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूत् ॥१२॥**

**अन्वयः भद्रात्मनो दुरधिरोहतनोः विशालवंशोन्नतेः कृतशिलीमुखसंग्रहस्य यस्यानुपप्लुतगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूत् ।**

**राजपक्ष में** – सुन्दर स्वरूप अथवा अन्तःकरण बाले, अनभिभवनीय (विलक्षण) शरीर से युक्त, स्वकुल की उन्नति करने बाले, वाण चलाने का निरन्तर अभ्यास करने बाले, अबाधगति बाले, तथा शत्रुओं का निवारण करने बाले, उस राजा का हाथ निरन्तर दान के (सङ्कल्प के) जल में शोभायमान रहता है।

**गजपक्ष में** - भद्रजाति बाले, चढने में कठिनाई से युक्त, ऊंचे शरीरबाले विशाल पृष्ठदण्ड बाले, मदजल के कारण शिलीमुख (भ्रमरों) का संग्रह करने बाले, विलक्षण गति बाले, उत्तम हाथी की सूंड (कर) मदजल (दानाम्बु) से सिक्त होने से निरन्तर शोभायमान रहता है।

तद्युक्तो व्यञ्जकः शब्दो ............................ ।

तद्युक्तो व्यञ्जनयुक्तः

..........................यत्सोऽर्थान्तरयुक्-तथा ।

अर्थोऽपि व्यञ्जकस्तत्र सहकारितया मतः ॥ २० ॥

तथेति व्यञ्जकः ॥२० ॥

तद् व्यञ्जनया युक्तः शब्दः व्यञ्जकः शब्दः कथ्यते। यत् स शब्दः अपरस्य अर्थस्य योगेन तद्वद्व्यञ्जको भवति। अतः काव्ये शब्दस्य सहकारित्वेन अर्थः अपि व्यञ्जको भवति।

इति काव्यप्रकाशे शब्दार्थस्वरूपनिर्णयो नाम द्वितीय उल्लासः ॥२ ॥

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ।।

# धन्यवादाः